हेमच०। कान्तस्तदर्थे रत्नमा० २सारसखगे च पुंस्त्री०।

**सरोरुहासन** पु० सरोरुहं पद्ममासनं यस्य। चतुर्मुखे ब्रह्मणि हेमच० तस्य विष्णुनाभिपद्मस्थितत्वात्तथात्वम्। २पद्मापविष्टमात्रे त्रि०।

**सरोवर** पु० सरोभिर्जलैर्व्रियतेऽसौ वृ-अप्। तड़ागे शब्दर०। तड़ागशब्दे ३२४०पृ० दृश्यम्। [संक्षिप्तसा०।

**सर्क** पु० सृ-क तस्य नेत्त्वम्। १वायौ २मनसि ३प्रजापतौ च

**सर्ग** पु० सृज-घञ्। १स्वभावे २सृष्टौ ३निर्मोहे काव्यादेः ४परिच्छेदे "सर्गोऽयमादिर्गतः" इति नैषधम्। ५निश्चये अमरः "यदि सर्ग एष ते" इति रघुः। ६मोक्षे ७उत्साहे मेदि० ८अनुमतौ हेमच०।

सृष्टिरूपः सर्गश्च नवविधः भाग० ३।१०अ० उक्तो यथा "सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः। कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः। आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः। द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः। भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान्। चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः। वैकारिको देवसर्गः पञ्चमो यन्मयं मनः। षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः। षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु। रजोभाजो भगवतो लीलेयं हरिमेधसः। सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषाञ्च यः। वनस्पत्योषधिलतात्वक्सारावीरुधो द्रुमाः। उत्स्रोतसस्तमःप्राया अन्तःस्पर्शाविशेषिणः। तिरश्चामष्टमः सर्गः सोऽष्टविंशद्विधो मतः। अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः। गौरजो महिषः कृष्णः शूकरो गवयो रुरुः। द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम!। खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा। एते चैकशफाः क्षत्तः! शृणु पञ्चनखान् पशून्। श्वा शृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ। सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः। कङ्कगृध्रवकश्येनभासभल्लूकबर्हिणः। हंससारसचक्राह्वकाकोलूकादयः खगाः। अर्वाक्स्रोतास्तु नवमः क्षत्तरेकविधो नृणाम्। रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः। वैकृतास्त्रय एवैते देवसर्गाश्च सत्तम!। वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः। देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः। गन्धर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः। भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः। दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः"।

**सर्गबन्ध** पु०बन्ध-भावे घञ् सर्गैर्बन्धः ३त० "कृदभिहितभावो द्रव्यवत् प्रकाशते" इति न्यायात् सर्गबन्धस्य कर्मपरता न कर्मणि घञ् तथात्वे महाकाव्यविशेषणतया क्लीवतापत्तेः। महाकाव्ये तल्लक्षणं महाकाव्यशब्देऽनुक्तत्वात् अत्र दर्श्यते सा०द० "सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः। सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः। एकवंशभवा भूपाः कुलजा बहवोऽपि वा। शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते। अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः। इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्। चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत्। आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा। क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्त्तनम्। एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः। नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह। नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते। सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्। सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः। प्रातर्मध्याह्नमृगयाशैलर्त्तुवनसागराः। सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः। रणप्रयाणोपयममन्त्रपुत्रोदयादयः। वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह। कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा। नामास्य सर्गोपादेयकथया सर्गनाम तु"।

**सर्ज** अर्जने भ्वा०पर०सक० सेट्। सर्जति असर्जीत् सृजिवर्जने सर्जस्यापि वर्जनं तेन षोपदेशत्वाभावान्न षत्वम्। तत्र प्रमाणाभावात् षोपदेश एव न्याय्यः। [शाले शब्दच०

**सर्ज** पु०सृज-अच्। १शालवृक्षे अमरः।२तद्रसे (धुना) ३पीत-

**सर्जक** पु०सृज-ण्वुल्। १पीतशाले अमरः २शालवृक्षे जटा०

**सर्जगन्धा** स्त्री सर्जस्येव गन्धो यस्याः। रास्नायां रत्नमा०।

**सर्जन** न०सृज-ल्युट्। १सैन्यपश्चाद्भागे शब्दर० २सृष्टौ च।

**सर्जनिर्य्यासक** पु० सर्जस्य निर्यास इव कायति कै-क। राले (धुना) राजनि०। [रसे त्रिका०।

**सर्जमणि** पु० सर्जस्य शालवृक्षस्य मणिरिव। (धुना) सर्ज-

**सर्जरस** पु० ६त०। शालवृक्षरसे (धुना) अमरः।

**सर्जि(र्जी)** स्त्री सृज-इन् वा ङीप्। १नदीभेदे २तत्कूलजे सर्जिकाक्षारे (साजिमाटि) रत्नमा०।

**सर्जिका** स्त्री सृज-ण्वुल् टाप् अतइत्त्वम्। १सर्जिकाक्षारे "पाक्यक्षारो यवक्षारो यावशूको यवाग्रजः। सर्जिकोऽपि स्मृतः क्षारः कापोतः सुखवर्चकः। कथितः सर्जिकाभेदो विशेषज्ञैः सुवर्चिका। यवक्षारो लघुः